# Dayanandah Svami Jayati Bhuvane Bhaskararuchi

# दयानन्दः स्वामी जयति भुवने भास्कररुचिः

## Document Information

Text title : Dayanandah Svami Jayati Bhuvane Bhaskararuchi

File name : dayAnandaHsvAmIjayatibhuvanebhAskararuchiH.itx

Category : misc, sanskritgeet, gurudev

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

May 31, 2020

*sanskritdocuments.org*

Dayanandah Svami Jayati Bhuvane Bhaskararuchi

# दयानन्दः स्वामी जयति भुवने भास्कररुचिः

(शिखरिणी वृत्तम्)
गुणानामाधारो विदित-श्रुति शास्त्रार्थ-निचयः
समुद्धर्ता भर्ता पतित-जन-चित्ताऽर्ति-हरणः ।
श्रयन्नात्मोत्सर्गं पर-हित-रतः स्वार्थ-विरतो
दयानन्दः स्वामी जयति भुवने भास्कर-रुचिः ॥

'दयायाः आनन्दो' विलसति गुणानां समुदयः,
'ऋषि'-र्वेदार्थानां गहन-मननावाप्त-शुभ धीः ।
श्रुतीनां सिद्धान्तान् विशदयति वेदार्थ विवृतौ,
सरस्वत्या स्रोतो जयति यतिवर्यो गुणनिधिः ॥

अनाथानां नाथः शरणमबलानां गुणि-गुरुः,
विनेता भीतानां सुपथमुपनेतां च सुधियाम् ।
शरण्यो दीनानां गुणि-गण-वरेण्यः श्रुति-मतिः,
दयानन्दो योगी जयति भुवने भास्कर-रुचिः ॥

प्रणेता भाष्याणां श्रुति-गदित-तत्त्वार्थ-निलयो
यति सत्यार्थं यः प्रकटयति 'सत्यार्थ' सुकृतौ ।
श्रुतीनां तत्त्वार्थं विशदयति 'ऋग्भाष्य'-विवृतौ
दयानन्दो वाग्मी जयति भुवने भास्कर-रुचिः ॥

ऋषीणां प्रत्नौ यः सरणिमनुसृत्याऽऽशु विदधे
श्रुतीनां शिक्षार्थं गुरुकुल-ततिं ज्ञान-रुचिराम् ।
विरुद्धं वेदानां तदिदमिह हेयं सुपथगैः,
दयानन्दो दान्तो जयति भुवने भास्कर-रुचिः ॥

जगन्नेता धीरः सकल-गुण-राशिर्बुध-सुहृद्,
नदीष्णो वेदानां जनहित कृतं-स्वार्थ-विरहः ।
अविद्याया ध्वान्तं व्यपमयदिहाऽध्यात्म-सुदृशा

मुनीन्द्रो व्यारेजे सकल-सुख-सौभाग्य-सरणि ॥

समाज त्वार्याणां प्रति-नगरसंस्थापयदिहं,
समुन्मूल्याऽऽमूलं श्रुति विपथ-पाखण्ड-निचयम् ।
सदादर्शं प्राच्य भुवि विनिदधे शान्ति-सुखदं
दयानन्दो धीरो जयति भुवने भास्कर-रुचिः ॥

गवां रक्षा कार्या, पदमनुविधेयं च सुधियाः,
गुणा ग्राह्या हेया सततमशिवा दोप-निकराः ।
सदाऽऽर्याणां भाषा प्रचरतु भवे भव्य-गुण-वा,
य एवं व्याचरयौ जयति स यतिर्भास्कर-विभौ ॥

जने ह्यस्पृश्यत्वं नहि श्रुति-मतं नापि हित-कृद्,
विजातेर्जातेश्च बहुविध-विभागो नहि हितः ।
विदेशीय राज्यं नहि मतिमतां मान-गुण-दं,
मनोज्ञः स्वातन्त्र्यं निज-बलि-कृतेनापि सुखदम् ॥

सुशिक्षा नारीणां, विविध-मत शुद्धिं प्रचलयन्,
पदाऽऽक्रान्त-त्राणः विदधदनिशं जीवन-पणैः ।
'समं लोके चाऽऽर्यं कुरुत' इति लोकानुपदिशन्,
दिवं यातो जीवत्यमर इव वन्द्यो यतिवरः ॥

Proofread by Mandar Mali

*Dayanandah Svami Jayati Bhuvane Bhaskararuchi*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*